पुलरत्नानामधिकारो वज्रपूर्वाणाम। रत्नानि बलाद्दै-त्याद् दधीचितोऽन्ये वदन्ति जातानि। केचिद्भुवः स्वभावाद् वैचित्र्यं प्राहुरुपलानाम्। वज्रेन्द्रनील-मरकतकर्केतनपद्मरागरुधिराख्याः। वैदूर्य्यपुलकवि-मलकराजमणिस्फटिकशशिकान्ताः। सौगन्धिकगोमेद-कशङ्खमहानीलपुष्परागाख्याः। ब्रह्ममणिज्योतीरसशस्य-कमुक्ता प्रवालानि"। [शब्दर०।

**रत्नकन्दल** पु० रत्नेषु कन्दल इव रक्तत्वात्। प्रवाले

**रत्नकूट** पु० रत्नमयः कूटः शृङ्गमस्य। पर्वतभेदे शब्दर०।

**रत्नगर्भ** पु० रत्नयुक्तं गर्भं मध्यं यस्य बा० त०। १समुद्रे राजनि० २कुवेरे च त्रिका०। ३पृथिव्यां स्त्री हेमच० ४सत्पुत्रायां नार्य्याञ्च स्त्री।

**रत्नद्वीप** पुंन०। रत्नमयो द्वीपः। तन्त्रोक्ते सुधासमुद्रमध्य-स्थिततया ध्येये रत्नमयेऽन्तरीपे।

**रत्नधेनु** स्त्री रत्नकल्पिता धेनुः। महादानार्थं कल्पितायां रत्ननिर्मितायां धेन्वाम्। मत्स्यपु० २८७अ० दृश्यम्।

**रत्नपारायण** न० रत्नानां पारायणं साकल्येन स्थानम्। सर्वरत्नाधारे "रत्नपारायणं नाम्ना लङ्का" भट्टिः।

**रत्नमुख्य** न० रत्नेषु मुख्यम्। हीरके अमरः।

**रत्नवती** स्त्री रत्नानि सन्त्यस्याः मतुप् मस्य वः। १पृथिव्याम् शब्दर०। २रत्नयुक्ते त्रि०।

**रत्नसानु** पु० रत्नानि सानावस्य। सुमेरुपर्वते अमरः।

**रत्नसू** स्त्री रत्नानि सूते सू—क्विप्। पृथिव्याम् हेमच०।

**रत्नाकर** पु० ६त०। १समुद्रे अमरः। रत्नोत्पत्तिस्थाने २मणिखनौ च।

**रत्नाचल** पु० रत्ननिर्मितः अचलः। दानार्थं कल्पिते रत्ननि-र्मिते पर्वते धान्यशैलशब्दे २८८१पृ० दृश्यम्। [भूषणभेदे।

**रत्नाभरण** न० रत्नघटितमाभरणम् शाक०त०। (जड़ाओ)

**रत्नावली** स्त्री ६त०। १रत्नसमूहे तद्घटितहारे ३वत्स-राजपत्नीभेदे च रत्नावलीमधिकृत्य कृतः ग्रन्थोऽण् आख्यायिकायां तस्य लुक्। श्रीहर्षकृते चतुरङ्कात्मके ४नाटिकाभेदे। [स्त्रीत्वे वा ङीप्।

**रत्नि** पुंस्त्री० ऋ-कत्निच्। बद्धमुष्टिहस्तपरिमाणे अमरः।

**रथ** पु० रम्यतेऽनेन अत्र वा रम—कथन्। १स्वनामख्याते यानभेदे अमरः। २देहे च "आत्मानं रथिनं विद्धि शरीरं रथमेव च" इति गीता। अत्र रूपकमित्यन्ये ३पादे ४वेतसवृक्षे विश्वः ५तिनिशवृक्षे राजनि०। यानरूपरथभेदादिकं हेमच० उक्तं यथा

"युद्धार्थे चक्रवद्याने शताङ्गः स्यन्दनो रथः। संक्री-ड़ार्थः पुष्परथो देवार्थस्तु, मरुद्रथः। योग्यारथो वैन-यिकोऽध्वरथः परियानिकः। कर्णीरथः प्रवहणं डयनं रथगर्भकः। अनस्तु शकटोऽथ स्याद्गन्त्री कम्बलि वाह्यकम्। अथ काम्बलवास्त्राद्यास्तैस्तैः परिवृते रथे। स पाण्डुकम्बली यः स्यात् संवीतः पाण्डु-कम्बलैः। स तु द्वैपो वैयाघ्रश्च वृतो यो द्वीपिचर्मणा। ज्योतिर्विदाभरणे तत्करणकालादि उक्तं यथा "लोल-मैत्रलघुजिष्णुकमेषु स्यन्दनाखिलविधानमथाहुः। सेन-सद्द्युषु बलाम्बुतपःस्थैः साधुराशिमति साधुभिरङ्के। रथचक्रभागमाह "उष्णाद्विणकरकर्णयुगाच्चाह्यस्त्वच्चवलयं वलयस्य। सव्यभागनिचितभ्रममध्यादादिमध्यमनसो नव-भागम्। अथभे भवति सङ्कलिरन्तः कूवरोडुनि जयोऽथ रथाङ्के। सप्तिभेऽर्थहृतिरन्तरसन्धौ भीति-रिष्टमनसो ननु गर्भे। अथ रथकृत्यमुहूर्त्ते "पुष्ये पुनर्वसुज्येष्ठानुराधारेवतीद्वये। श्रवणादित्रिभे हस्त-त्रितये रोहिणीमृगे। सार्के सौम्यदिने सौम्यविलग्ने रथकर्म सत्"। [अमरः

**रथकड्या** स्त्री रथानां समूहः रथ+कड्यच्। रथसमूहे

**रथक(का)र** पु० रथं करोति कृ—अच्—अण् वा। १रथ-निर्माणकारके (सूत्रधार) २वर्णसङ्करभेदे करण्यां माहिष्याज्जाते पुंस्त्री०। [अमरः।

**रथकुटुम्बिन्** पु० रथस्य कुटुम्बीव चालकत्वात्। सारथौ

**रथगर्भक** पु० रथस्य गर्भमिव स्वार्थे कन्। १कर्णीरथे २स्कन्धवाह्ययाने (पालकी) हेमच०।

**रथगुप्ति** स्त्री रथस्य गुप्तिः शस्त्रवारणार्थं रक्षा उपचारात् तत्स्थानम्। रथस्य शस्त्रवारणार्थे गुप्तस्थाने अमरः।

**रथचरण** पु० रथस्य चरण इव गतिहेतुत्वात्। १रथचक्रे तन्नामनामके २चक्रवाकविहगे पुंस्त्री० शब्दर० स्त्रियां ङीष्। रथपादादयोऽप्यत्र। [वृक्षे अमरः।

**रथद्रु** पु० रथनिर्माणाय द्रुः रथनामको वा द्रुः। तिनिश-

**रथन्तर** त्रि० रथेन तरति तृ-खच् मुम् च। १रथनेतरि। "अभित्वा शूर" इत्यस्यामृचि गीते २सामभेदे न०। "स्वरादिविशेषानुपूर्वीमात्रस्वरूपे ऋगक्षरव्यतिरिक्तं यत् गानम् तद्रथन्तरम्" सामार्चिकभाष्यम्। "वामदेव्यं बृहत् साम ज्येष्ठसाम रथन्तरम्" इत्युपक्रमे "पश्चिमे द्वार-पालौ तु पठेतां सामगाविति" वि० पा०।

**रथयात्रा** स्त्री रथेन यात्रा। आषाढ़शुक्लद्वितीयायां जग०